१९२

॥इदं पुस्तकं पंचकोशविवेक॥पान ७

श्रीगुरुमूर्त्तयेनमः॥ तेभ्य एव खुरास्त्रष्टं ब्रह्मांडाख्यमिदं मया॥ भुवनानि विशिष्टानि निर्मि
तानि त्रिविधानि च॥ ब्रह्मांडस्योदरे देवादेवाश्च विविधाश्च मे॥ देवादयो मनुष्याश्च तथा प
श्वादयो जनाः॥ नैजतत्कर्मणि रूपेण मया सृष्टाः त्रिधा जयो॥ देवा इत्येवं संबोधनं देवादय
इति। अत्र देवराट् कर्म देवाभिप्रायः। अन्येषां देवानां देवा इति पदेन एष थकु प्रतिपादितत्वात्।
तत्तत्कर्मणि रूपेणेति। तत्तत्प्राणिकृत नपरिपक्व पुण्यपाप निवहस्यैव विशेषेण तत्फलभृते
विविध सुखदुःखोपभोगाय देवमनुष्यादिजन्मदेहेन नानाविध भोगायतनानि निर्मिता
नीत्यर्थः। सत्स्वपि सर्वेषु प्राणिषु पुरुषस्यैव विद्याधिकार इति तस्यैव सृष्टिः श्रुत्या प्रतिपा
दिता॥ अत एवैतरेयके पुरुषाकार परिणाद्देहमध्ये अवस्थितस्यैवात्मनो ज्ञानविशेषाभिमा
न विद्याधिकारः श्रूयते। पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति
विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोको मर्त्येनामृतमीप्सतीति। अन्नपरिणामरूप पु
रुष शरीर तादात्म्यापन्नत्मनः सर्वांतरब्रह्मरूपत्वं प्रतिपादयितुं बाह्याभ्यंतराणि
अन्नमय प्राणमय मनोमय विज्ञानमयानंदमयाख्यानि पंचकोशाः प्रतिपत्तिसौकर्या

॥१॥

स्या २ त ५

अस्थिस्त्यादिना ॥
यस्स वा एष पुरुषोऽन्नमयो रसे इत्यादिना श्रुतो प्रतिपादिता त्वां न संगच्छते वि। तत्रान
तत्र ताद्रूप्ये वसावेनावस्थितस्य त्रीणि शरीराणि भवंति स्थूलसूक्ष्मकारणात्मना। तत्रान्न
रसपरिणामरूपं षाट्कौशिकं स्थूलशरीरं तत्तादात्म्यापन्नो अन्नमय आत्मा भवति स
वा एष पुरुषोऽन्नरसमयः इति श्रुतो तद्विवेचनप्रकृतेमात्मानं परामृश्य तस्यान्नमयत्वे
प्रतिपादनात्। एवं प्राणादिकोशानां तादात्म्येन प्राणमयादित्वमपि तस्यात्मनोऽधिगंत
व्या। तस्यान्नपरिणाम = वक्ष्यमाण = रूपस्य स्थूलशरीरस्योत्पत्त्यापदेशेन स्वशरीरी
यादन्यस्य पुत्रमित्रकलत्रादेरात्मत्वत्वमानि वर्तितैः। तस्य मध्ये पि सूक्ष्मस्तूतारश्चेय
यत्समदशकं लिंगं तदात्मनः सूक्ष्मशरीरं। तदुक्तं यस्य हेतुभूतायामलिन्नसत्त्वप्रधा
नाऽविद्यास्कुश्रावव भासते सा तस्यात्मनः कारणशरीरं। तत्र सूक्ष्मशरीरे प्राणमय
मनोमयविज्ञानमयाख्यकोशत्रयांतर्भावः। आनंदमयस्तु कारणशरीरमिति विवे
कः॥ सत्त्वरजस्तमोगुणात्मकमायाकार्यत्वाद्भूतान्यपि गुणत्रयात्मकानि तत्र वियदा
दि सूक्ष्मभूतानां येऽपंचरजोंशास्ते शरगा निर्वाच्या पिपादादानि पंचकर्मेंद्रियाणि

तदुक्तोंशः समुदायार्थः प्राणनादिक्रियाहेतुः क्रियाशक्त्यात्मकः प्राणः तस्य प्राणापानाद्याः
पंच वृत्तयः एवं पंचप्राणकर्मेन्द्रियस्वरूपः प्राणमयकोशविशिष्टस्यात्मनः उपदेशोऽन्नबाह्यस्य
नात्मत्वं प्रतिपादयति श्रुतिः। तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमय
इति। तदेतदाह॥ अस्थिस्नाय्वादिरूपं यच्छरीरं ज्ञातिदेहिनां॥ तस्मात्प्राणमयो ह्यात्मा विभिन्नश्चा
न्तरो यतः॥ ३॥ यो यं प्राणमयो ह्यात्मा ज्ञातिसर्वशरीरिणां॥ ७॥ अस्थिति। अन्नमयस्यात्म
न उपाधिभूते यदस्थिस्नाय्वादिरूपमन्नकार्यषाट्कौशिकं शरीरं तस्मात्सकाशादुदीरिते
प्राणमय कोशविशिष्ट आत्मा विभिन्न एव ज्ञातव्यः। अतः कारणादयमान्तरः अन्तरदेह
मध्ये वर्तमानोऽनुभूयते। अतो बाह्यो देहात्प्राणमय आत्मा विवेकेन प्रत्येतव्य इत्य
र्थः। अत एवासिकोशावद्बहिरावादकत्वसाम्यादन्नविकारस्य देहस्य कोशत्वं। एवमुत्त
रत्रापि मनोमयाद्यात्मोपदेशे पूर्वस्य पूर्वस्य बाह्यतया विविक्तत्वेनात्मत्वस्य निरास
कोशरूपत्वमवगंतव्यं। एवं प्राणमयोपदेशेन बाह्यस्यान्नमयस्य नात्मत्वं प्रतिपाद्य
प्राणमयस्यापि कोशरूपत्वेनानात्मत्वं प्रतिपादयितुं तस्मादप्यान्तरं मनोमयमात्मा
नमुपदिशति श्रुतिः। तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमय इति॥

नं

॥२॥

तत्सं गृह्णाति। योयमिति। वियदादिपंचसूक्ष्मभूतसत्वांशैरारब्धानि श्रोत्रादीनि पंचज्ञाने-
न्द्रियाणि। तत्सत्वांशसमुदायपरिणामरूपमंतःकरणं तदुपादानत्वे तस्य सत्वस्यात्म-
स्वरूपस्फूर्तसुखप्रकाशाभिव्यंजकसामर्थ्यसद्भावात्तत्कार्यमंतःकरणमपि स्वरू-
पसुखाभिव्यंजकवृत्त्यात्मनास्वरूपप्रकाशाभिव्यंजक[illegible]वृत्त्यात्मना द्विधा
परिणमते। तत्र प्रकाशाभिव्यंजकाद्वृत्तेरपि द्वैरूप्यं ज्ञो ध्रुवेधा संकल्पविकल्पात्मि-
का मनःसंज्ञां लभते। रजःसंस्पर्शविरहाच्च नैर्मल्ये सति निश्चयरूपा सती बुद्ध्या-
ख्यां लभते। एवं मनोबुद्धिभेदभिन्नवृत्तिमदंतःकरणं सह सूतानि चक्षुरादीन्द्रियाण्य-
पि विमर्शनिश्चयरूपद्विविधज्ञानजनकत्वेन द्विविधानि भवंति। तत्र विमर्शज्ञानज-
कपंचज्ञानेन्द्रियसहितमनःसंज्ञकवृत्तिमदंतःकरणोपाधिविशिष्ट आत्मा मनोमयः। स च
प्राणकोशगतप्राणापानादिसंघाताद् इति। अंतरवस्थितात्मस्वरूपचैतन्याभिव्यंजकत्वलक्ष-
णात्स्वभावभेदादंतरत्वमित्यर्थः॥ x=प्राणमयादांतरत्वेन विभिन्नः। तत्र हेतुमाह। ततो म x=

x= नोमयस्यात्मा विभिन्नश्चांतरस्वतः॥४॥ स्वतx=

5

प्राणमयस्य रजःपरिणामरूपत्वान्नोदीरितविसर्गशक्तिमभिव्यनक्ति। अत एव सुषुप्तेऽस्यापि प्र-
णादेर्जाग्रद्वच्चैतन्यस्य विशेषाभिव्यक्तिर्न दृश्यते। उच्छ्वासनिश्वासादिक्रियाप्रवर्तकः स तु अ-
न्नमयदेहस्य धारणमेव केवलं करोति। तथा च प्राणवाक्यं श्रूयते। अहमेवैतत्पञ्चधात्मानं प्र-
विभज्यैतद्बाणमवष्टभ्य विधारयामीति। एवमनयोर्विविक्तस्वरूपत्वान्मनोमय आत्मा प्रा-
णमयादान्तरो विविक्तश्च प्रत्येतव्य इति भावः॥ एवं प्राणमयस्य बाह्यत्वेन कोशरूपत्वोदना-
त्मत्वं प्रसाध्य मनोमयस्यापि तथात्वं प्रतिपादयितुं तस्मादप्यान्तरं विज्ञानमयमात्मानमुप-
दिशति श्रुतिः। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमय इति। तत्संग्रह-
ति॥ योऽयं मनोमयोऽस्यात्मा ना विसर्गशारीरिणाम्॥ विज्ञानमय आत्मा वर्तते तेऽन्यश्चान्तरो यतः॥
॥५॥ योऽयं मनोमय इति। प्रागुदीरितरीत्या निश्चयज्ञानजनकबुद्धिरिन्द्रियसहितबुध्यास्व-
वृत्तिमदन्तःकरणविशिष्टो विज्ञानमयः। विज्ञायतेऽनेनेति विज्ञानमुक्तविधमन्तःकरणं तन्मय-
स्तद्विकारः स च विमर्शात्मा रूपान्मनोमयादान्तरत्वेन विभिन्नः। आन्तरत्वं च रजःसंस्प-
र्शविरहेणान्तरवस्थितात्मचैतन्यस्य निश्चयरूपेण विशेषतस्तत्राभिव्यक्तेः। अत एव सुषु-

३

पदार्थविषयनिश्चयज्ञानवत एव विद्याकर्मणोरधिकार इत्यभिप्रेत्य विज्ञानमयात्मनो य
ज्ञादिक्रियाहेतुत्वमाम्नायते। विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति। मनोमयवद्विज्ञानम
यस्यापि बाह्यत्वेनानात्मत्वं प्रतिपादयितुमस्मादप्यंतर आनंदमयमात्मानंदाकृतिरूपवि
शति॥ तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्मानंदमय इति। तत्संगृह्णाति॥ विज्ञा
नमय आत्मा यो विज्ञाति स कर्तात्मनो॥ आनंदमय आत्मा ततोऽन्यश्चान्तरोऽयं ततः॥६॥
विज्ञानमय इति विद्याकर्मणोः फलं तत्सुखमानंदस्तदभिव्यंजकोपाधिविशिष्ट आत्मा
आनंदमयः। स च फलरूपत्वेनांतरंगत्वात् फलरूपाद्विज्ञानमयादंतरो विविक्तश्च स एवात्म
त्वेन बोद्धव्यः। विज्ञानमयस्तु तस्य लेशापन्नस्तु विद्याकर्मनिष्पादकतया बहिरंगत्वाद्
धानात्मा एवं प्राणमयादिकोशत्रयस्य विवेके नात्मनः सूक्ष्मशरीरादपि विवेकः सिद्धो
भवति। ज्ञानेंद्रियाणि पंचैव तथा कर्मेंद्रियाण्यपि। वायवः पंच बुद्धिश्च मनः सप्तदशं विदु
रिति हि सूक्ष्मशरीरस्वरूपम्। तस्य च सप्तदशकस्य प्राणमयादिकोशत्रयरूपेणावस्थि

स्य प्रतिपादितत्वात्। एवं स्थूलसूक्ष्मशरीराभ्यामात्मनः सिद्धेऽपि विवेके कारणशरीरादपि तस्य
विवेकेन कर्तव्यो। तदर्थमिदं चिंतनीयं। किमानंदमय एव सर्वांतर आत्मा। उत ततोऽप्यांतरमन्य
द्वात्मास्ति तदेव सर्वांतरमात्मत्वेनाभिमंतव्य। आनंदमयस्तु अन्नमयादिवत्कोशो वि
कार एवेति। तत्रान्योंतर आत्मानंदमय इति वदस्माद्न्यस्यांतरस्यात्मनोऽनुपदेशा
न्मयटो विकारप्रायपठितस्य तद्वाधेन प्राचुर्यार्थतयाप्युपपत्तेः। प्रियशिरस्त्वा
दीनां चोपाधिकत्वेनाप्यस्मिन्संभवात्। यदेष आकाश आनंदो न स्यात् सैषानंदस्य
मीमांसा भवतीत्यानंदशब्दाभ्यासस्य च संतत्योतिषायजेतिज्योतिःशब्दस्य ज्योतिष्टो
मप्रतिपादकत्ववदानंदमयपरत्वेन व्याख्यातुं शक्यत्वादस्यैवमानः स एव सर्वांतर आ
त्मेति चेत्। मैवं। ब्रह्म पुच्छं प्रतिष्ठेति आनंदमयादिसर्वाधारस्य सर्वांतरस्य ब्रह्मणः पृथ
गुपदेशात्। न च तत्र तत्वल्वत्रैप्राधान्येन विवक्षितं। ब्रह्मविदाप्नोति परमिति फलवद्ब्रह्म प्रश्नी
न प्रक्रम्य सत्यं ज्ञानमनंतं ब्रह्म। ब्रह्मणा विपश्चितेति अस्ति ब्रह्मेति वेद चेदसदेवमभ्य

दि

४

8

स्यमानत्वात्। अभ्यासो दर्शितः। अपूर्वतालिंगं। उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं। अर्थवादो
पपत्ती च लिंगं तात्पर्यनिर्णये इत्युक्तत्वात्। ब्रह्मशब्दोप्यपरिच्छिन्ने निर्विकारे ब्रह्मणि मुख्यः। न तु
मावयवे आनंदमये। न चैतस्य ब्रह्मपुच्छं प्रतिष्ठेत्यानंदमयावयवत्वेनावगतोपि प्राधान्यमि
ति मंतव्यं। ब्रह्मपुच्छमिति पदद्वयरूपाद्वाक्यात्प्रतीयमानस्यावयवत्वस्य ब्रह्मपदाभ्यासबा
धात्। श्रुतेर्हि वाक्याद्बलीयस्त्वात्। आनंदशब्दाभ्यासोपि निरतिशयनिर्विकारसुखरू
पे ब्रह्मणि मुख्यः। विज्ञानमानंदं ब्रह्म। आनंदो ब्रह्मेति व्यजानादित्यादि श्रुतिप्रसिद्धः। य
द्यानंदमय एव सर्वांतरआत्मा स्यात्। असन्नेव स भवति असद्ब्रह्मेति वेद चेदिति श्लोकोदा
हरणमसंगतं स्यात्। तथा एतमानंदमयमात्मानमुपसंक्रामति। अन्नमयादिवदुपसंक्रा
मितत्वप्रतिपादनं नोपपद्येत। अन्यस्योपसंक्रमितस्याभावात्। तस्माद्ब्रह्मैव समर्थो न स्वप्रा
धान्येन निर्दिष्टमित्यंगीकर्तव्यं। पुच्छशब्दस्त्ववयवप्रायपाठेनोपाधारत्वमात्रलक्षकः। एवं चानं
दमय इति मयटो विकारप्रायपाठेनोत्कृष्टैवोत्तरं भवति। तस्मादन्नमयादिवदानंदमयोप्य

दे२

पाधिविशिष्ट इति सिद्धं। एतच्चानंदमयोऽभ्यासादित्यधिकरणे निर्णीतं। स चोपाधिः प्रागुदीरितसा
त्विकांतःकरणपरिणामरूप आत्मस्वरूपसुखाभिव्यंजिका वृत्तिः सा च प्रियमोदादिभेदेन
त्रेधा भिद्यते निरतिशयानंदो ह्यात्मनः स्वरूपं। तच्च पुण्यकर्मोपस्थापितपुत्रवित्तक
वादिदर्शनलाभोपभोगजनितैः प्रियमोदादिसंज्ञकैरंतःकरणवृत्तिविशेषैरभिव्यज्यते। अ
भिव्यक्तं च तद्विषयसुखमिति लोको व्यवहरति। तच्च क्षणिकत्वप्रतीतिस्कं व्यंजकोपाधिक
तानतथाविद्याश्चरत्वयः स्वापप्रलयादौ स्वकारणे सत्त्वे लीयंते। तथा च कारणात्मनावस्थि
तत्तथाविधवृत्तिकर्ममलिनसत्त्वप्रधानामविद्याऽपरपर्यायं तावद्रूपाज्ञानमेवानंदमयो
पाधिर्विवक्षितः। स चानंदोऽंतःकरणवृत्तिविशेषैरभिव्यज्यते। तथा विविक्तेऽप्यंतःकरण
आनंद इति वदतो भाष्यकारस्यापि कारणसत्त्वपरत्वमेवाभिप्रेतोऽर्थ इति व्याख्येयं। ये त्वन्य
था व्याचक्षते तेषां तथाविधानंदज्ञानादिकोऽनहंतः स्यात्। ईदृगुपाधिविशिष्टो य आनंदमयः
सोऽयं प्रागुक्तरीत्या विज्ञानमयादांतरोऽज्ञातव्य इत्यर्थः॥ एवं पंचकोशाः प्रतिपादिताः। तत्र बाह्यस्या
न्नमयादेरांतरेणांतरेणात्मनाऽऽनयत्पूर्णत्वं श्रुतिः प्रतिपादयति। तेनैष पूर्णः स वा एष पुरुषविध एव

५

श्री २

ते। तत्संग्रहः॥ इति। योयमन्नमयः सोयं पूर्णः प्राणमयेन तु। मनोमयेन प्राणोपि तथा पूर्णस्त्वनावृतः॥ ७॥
तथा मनोमयो ह्येष पूर्णो ज्ञानमयेन तु। आनंदेन सदा पूर्णस्तथा ज्ञानमयः स्मृतः॥ ८॥ तथानंदम
यश्चात्मा ब्रह्मणान्येन साक्षिणा। सर्वान्तरेण संपूर्णो ब्रह्मणा नेन केनचित्॥ ९॥ योयमिति। योयं
प्रतिपत्तिसौकर्याय शिरः पुच्छपक्षान्तरादित्वेन परिकल्पितोऽन्नमयः कोशः सोयं स्वस्मादान्तरेण त
थाविधपरिकल्पितावयवेन प्राणमयेन पूर्णः। यथा मूषाकारप्रतिमा स्वान्तर्निषिक्तेन द्रुतताम्रेण स
र्वशः पूर्यते तद्वत्। एवमुत्तरत्रापि योजना। ब्रह्मणाऽन्येनेति। यद्यप्यानंदमयोऽन्त्यांतरआत्मेति पृथ
निर्दिष्टो नास्ति तथापि ब्रह्म पुच्छं प्रतिष्ठेत्यानंदमयाधारत्वेन निर्दिष्टं सर्वोपलक्षणादिलक्षणं स्वात्म
निर्मायापरिकल्पितान्नमयादिसकलानात्मवस्तुसाक्षिभूतं परब्रह्म तेनांतरेण सर्वांतरं यद्ब्रह्म यस्य
वृत्तादात्म्याध्यासादन्नमयादयो ह्यात्मानः स्मृताः। तेनैव साक्षिणा नेन साक्षिरेतन्यरूपेण ब्र
ह्मणानंदम योपि पूर्णो व्याप्तः॥ ब्रह्मणान्येनेति। तत्रैकविधं ब्रह्म तु देशकालवस्तुभे
न त्रिविधपरिच्छेदराहित्येनाद्वितीयत्वादन्येन केनचिदपि वस्तुनानव्याप्तं। स्वयमेव सर्वमा
पूर्यापरिच्छिन्नं सद्वर्ततइत्यर्थः। एतावता निहितं गुहायामिति मंत्रवाक्ये यद्गुहानिहितत्वं ब्रह्मणः प्र

७

क्षिप

दर्शितं तद्व्याख्यातं भवति। तथाविधस्य सर्वांतरस्य ब्रह्मणः प्रतिपत्त्युपायत्वेनान्नमयादिपंच
कोशाः प्रतिपादिताः॥ न तदुपासनार्थाः॥ ननु येऽन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासत इत्यादिमंत्र
वाक्यादन्नमयादीनामुपासनं गम्यत इति चेत्। मैवं सर्वांतरस्योपासनाप्रकरण
स्थस्याऽन्नाद्वै प्रजाः प्रजायंत इत्यादिमंत्रस्य श्रुत्या कोशत्वेन प्रतिपादितान्नप्राणादिस्तु
वं इदं पितु तत्कोशावसाने संवादित्वेनोदाहृतत्वात्॥ यद्यत्रैवोपासनाविधिपरस्यात्मनामन्न
मयकोशादिहास्तत्लोके पक्षपातित्वादेनाश्रूयेत॥ न च श्रूयते। अतो मनोमयकोशस्य तावदु
देशार्थत्वमेव न तदुपासनार्थत्वं। तत्सामान्यादन्यापि तथैव योग्या कार्या इतरथोपासनोपदेशास
प्रतिपाद्यार्थत्वे दाद्वाक्यत्ते दस्यात्॥ संभवति वैत्र देवैवेत दृढानयक्तः। संभवस्य कवाक्य
त्वे वाक्यभेदस्ते नेष्यत इति न्यायात्॥ एवं सर्वांतरं ब्रह्मोपदिश्य तस्य निर्विशेषत्वेन वाङ्मनस
गोचरत्वादसत्त्वमाशंक्य तन्निरासाय मंत्रोयमुदाहृतः॥ असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्
अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति॥ तत्र यद्यप्यसदेव ब्रह्म तथापि तदस्तीति वेदनीय
मित्येवं विधार्थस्य स्फुरणाच्छिष्य संशयो भवति॥ किमसदेव ब्रह्म उत सदेवेति॥ तथा॥

६

स्य ब्रह्मणः सर्वगतत्वात्॥ अविद्वानपि तद्ब्रह्म प्राप्नोति न वा॥ यदि न प्राप्नोति तत्सामान्याद्विद्वान्
त ब्रह्मणो प्राप्नोति प्राप्नोतिवेति॥ तावेतौ विद्वदविद्वद्विषयौ प्रश्नौ कृत्यैव प्रदर्शितौ॥ उता विद्वा
मुलोकं प्रेत्य कश्चन गच्छतीति॥ आहो विद्वानमुलोकं प्रेत्य कश्चित्समश्नुता उ इत्यत्र श्रुति वि
रोधः॥ एतेषां त्रयाणामुत्तरस्तु तौ श्रेतिः सोकामयतेत्यादिका॥ तत्र रसरूपत्वाद्ब्रह्म प्राप्य
सत्वं तस्य प्रतिपादितम्॥ तेनोरसो वै सः॥ रसं ह्येवायं लब्ध्वानन्दी भवतीति तं संगृह्याहायमिदं
रूपुरुषः स्थसत्यज्ञानाद्वयात्मकं॥ स रसः सर्वदा साक्षान्नान्यथा स्फुरस्पुंगवाः॥ एतमेव रसं सा
क्षाल्लब्ध्वा देहिसे नातनं॥ सुखी भवति सर्वत्र नान्यथा स्फुरसत्तमाः॥ ५८॥ ॥ श्री॥ श्री॥ श्री